११५१

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1151

Title: Sattan San Jadesh Vichar

1151

Complete

Satri Sau Jadesh Vichar	Title
	Author
	Editor
	Year, Vols.
	Publisher
1151	Remarks

ति। तदुक्तं स्तुगौरवलाघवादिविचारोऽस्माभिरेवेत्यादिक्। तेनकथितपदद्वयोर्बंधःकापिप
रास्ता॥ यदिचानुवर्त्तिरावश्यकी तदावाक्यार्थद्वयंकल्पनीयं॥ वा कथं तेद्देन व्याख्याने हाषप्ति
क्वचित्कचित्प्रयोगाकुर्वन्ति वा चोयुक्तिपटवइति॥ तथावर्त्तमानार्थकस्यलटः स्थानेशतृशान
चौ नवलइत्येकः द्वितीयस्तुलटः स्थानेशतृशानचौ नवतइति॥ उत्तयथाप्यप्रथमा
ना समानाधिकरणइत्यस्यान्वयोऽनवस्थैव॥ यदिचैकतरपक्षोऽस्माभ्यं तस्यान्वययोग्यता
नस्यात्तदैवंसमाधानंसंगच्छते॥ अप्रसक्तिबाधके पर्युदासस्य परिहाराशकात्वादिति।
यदिचाधिकविधानमावश्यकं तर्हिवर्त्तमानार्थकत्तिन्नस्यधातुसंबंधेऽस्त्ययाद्द
तिसूत्रेणविहितन्नलाद्यर्थस्यापिलटः स्थानेशतृचू॥ नचौनवलइतिकल्प्यनी
यं॥ तेनवस्तुतःदृष्टत्वेऽस्मिन्नन्तूनार्थकस्यापिलटः शत्राद्देशाः यद्यत्रलटग्रहणमधि
कविधानार्थमितिकल्प्यते॥ तथालिटः कानज्वेतिसूत्रेपिनाचायांतामित्यर्थंतयै

य वक्तव्यं॥ तदपहाय कवयस्तु बहुलं प्रयुंजते इत्युक्तं। तदीकार्यां च गतानुगति
कत्वादिति तद्भावः। प्रकटितः स्वोक्तेरीत्या कथं न समाहितमित्याशंक्याह। यस्य तस्य
वर्त्तमाने लट् तस्य शतृशानचावित्येव वक्तव्ये लटः शतृशानचावित्युक्तिर्नूतनार्थ
स्यापि संग्रहार्थेत्यनुवृत्तिकल्पनाक्लेशो निष्फल इत्याहुः॥ कथं तर्हि आकृष्टमिति प्रयो
गास्समाधेया इति चेत्॥ प्रकारान्तरकः पन्थेति बोध्यं॥ अत्र केचित्। पूर्वसूत्रात्
लट्ग्रहणस्यानुकर्षणेपि पुनर्लट्ग्रहणसामर्थ्यादिष्टसिद्धिरिति॥ तन्न चारु॥ ल
ट्सामान्यग्रहणफलकत्वेन तदुपादानस्यावश्यकत्वात्॥ प्रकृतानुपयुक्तं हि त
दन्यार्थबोधनसमर्थं न भवति। नेह तथास्तीति वासरूपोऽस्त्रियामित्यतः सूत्रांतरा
द्वा यथाकथंचिद्विकल्पानुवृत्त्या प्रकृतपर्युदासः समाधेय इति तन्न सम्यक्। एवं
हि अजां वारयतः॥ द्वेत्र तुङ्गाणां विशति प्रज इति न्यायेन पर्युदासव्यक्तिचारासि ॥३॥

द्वावपि सर्वत्र शतृशानचौ वैकल्पिकत्वसिध्या लटः शतृशानजादेशावत्यक्षेति
ङादेशप्राप्तिर्दुर्वारा॥ ततश्च पचंतं चैत्रं पश्येति वत्पचतीति चैत्रं पश्येत्यस्य निष्प्र
योगापत्तिः॥ अन्ये तु योगविभागेनेदं समादधति। तथाहि लटः शतृशानचावित्ये
को योगः। तेन सर्वत्रापि लटः शतृशानचौ वा भवत इत्यर्थः सिध्यति। तेन कचित्प्रथ
मासमानाधिकरणेपि दोषो नास्तीति। पुनश्चाप्रथमासमानाधिकरण इत्यपरो
योगः कर्त्तव्यः॥ तत्र पूर्वयोगानुवृत्त्या यथोपदेशं विधिविहितार्थसिद्धिरिति॥ अत्रा
पि सूत्रस्थ धियो विप्रतिपद्यंते। योगविभागादिष्टसिद्धिरिति कांचित्प्रयोगसमा
धानार्थमयमुपायः॥ कश्चिद्धि प्रयोगान् समाधातुं न प्रभवति॥ या—दृचानं तत्प्रयो
गनिर्वाहार्थमसावावश्यकस्तर्ही हंस सूत्रं द्विधा विभज्य सूत्रद्वयमाचार्येण स्वयमु
पन्यस्तं स्यात्॥ ततश्च जीवत्पितृकः हस्ताग्र जाग्रच्छतकोटिः सन्धा हलगः पूजनीयः

प्रात्रं तत्प्रयोगयोगवित्त्वागेन सुकरसमाधानाः क्वाचित्कत्वात्तु विधेयविशेषणीभूताः डो २

सन्तु सुधीः कोविदो बुधः तं सन्तः श्रोतुमर्हन्ति: सन्ति सन्तः किं यन्तः सन्तो न पेक्षामन्वि
ताः इत्यादिषु प्रथमान्तपदानामनुवादविशेषणीभूतौ: पश्यन् अप्येवमित्यादयस्तु
न तथेत्युपायान्तरं तदर्थमन्वेषणीयमवश्यमवशिष्यते इति। ननु बहूनां प्रथमान्त
समानं अधिकरणे शतृशानजन्तशब्दानां विद्यमानत्वात् किंचित्पर्युदासेनेति चे
न्न। एतत्पर्युदासाभावे हि चैत्रः पचति पठति इत्यादौ सर्वत्र कर्त्तरि प्रयोगे तंडुलाः
पच्यन्ते वेदाः पठ्यन्ते इत्यादौ कर्मणि प्रयोगे च शत्रादेशः तिङादेशं बाधेत। ततश्च
चैत्रः पचन् चैत्रः पठन् तंडुलाः पच्यमानाः इति प्रयोगापत्तिः। तिङो हि लकारसा
मान्यविषयाः। शतृशानचौ तु लट्मात्रविषयाविति न बाधनसमर्थौ। किंच
येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति परिभाषयाप्यवश्यं ति
ङादेशप्राप्तौ सत्यां विधीयमानौ शतृशानचौ तदपवादभावं भजतः अपि च त

॥४॥

॥ श्रीगणेशाय नमः ॥ अथ शतृशानजादिविधायकसूत्रार्थो निर्णीयते। तत्र वर्त्तमाने लडि
उ ति सूत्रेणैव ततो ॥ लटः शतृशानचावप्रथमासमानाधिकरणे अनेन सूत्रेण वर्त्तमाना
र्थकस्य लटः शतृशानचौ विधीयेते। तत्र चाप्रथमासमानाधिकरण इति तयोर्विषय
व्यवस्था क्रियते॥ तत्र समानाधिकरणपदं भावप्रधानमित्याशयेन प्रथमान्तभिन्नाभिः।
प्रथमासदृशान्निर्घलभ्यद्वितीयादिविभक्तिभिः सामानाधिकरण्ये सत्येव तौ भवतो न
तु प्रथमासामानाधिकरण्ये इत्यर्थः सिध्यतीति वदन्ति। अत्र प्रथमाशब्दः प्रथमान्त
परः प्रत्ययग्रहणे तदन्तग्रहणात्। तस्य च नञा सह समासे नञिवयुक्तमन्यसदृशा
धिकरणे तथा ह्यर्थगतिरिति परिभाषा प्रवर्त्तते। तेन द्वितीयादिविभक्त्यन्तैरित्य
र्थः सिद्धः। तत्रोदाहरणानि॥ तिष्ठन्तं पयसि पुमांसं संसमात्रेणेक्ष्यमानेन कटं कुर्वाचि
दित्यादीनि द्रष्टव्यानि। प्रत्युदाहरणानि तु। लक्ष्मिमालाक्यतु लभ्यन्निगममुपहस

न्दृशो चयन्त्यशजं नून्तत्त्रश। एणान्हि पश्यन् समित्ति दृश मुखं वीक्ष्य रोमाञ्चमि
चन्॥ इत्याहे यंगवीनं चकितमपसरन्नेचर केदिगंतान्सिंचन् दृते न मूमि
ति लमिव तुलयन् पातुमापातवासाद् इति श्लोके पीतवा इति प्रथमांतस्य समाना
धिकरणानि सर्वाण्यपि विशेषणानीति बोध्यं॥ किंचात्र वर्त्तमाने लडिति सूत्रम
पि न प्रवर्त्तते॥ सर्वेषामेषां कालत्रयहानात्॥ न च धातुसंबंधे प्रत्यया इति सूत्रेण
पा लुङ् इति प्रसक्तः। लोडं तत्क्रियापदप्रतिपाद्यवर्त्तमानकालेन तेषामपि वर्त्तमाना
र्थकत्वेति वाच्यं॥ आशीरर्थस्य लोटः कालवाचकत्वाभावात्॥ आशिषि लिङ्
लोटाविति सूत्रे वर्त्तमानकालाननुवृत्तेरिति। अथ पश्यन् प्रश्य एवं स्पृशन् जिघ्रन्
न्निति व्यासोक्तौ प्रथमांतसमानाधिकरणानां का गतिः न चैषां घटसत्त्वेन बाहुल
कत्वेन वा समाधानं युक्तं॥ तयोरगतिकगतित्वात्। संति हि काव्ये एवंविधाः शतशः

॥१॥

प्रयोगाः॥ तथाहि रघुवंशे ससेनां महतीं कर्षन्निति॥ ययौ वनस्थलीः पश्यन् इत्या॥
दयः। कुमारसंभवे निवृत्तपण्णाशुमिवाहितं ताविति। किरातार्जुनीये च। कुर्वन्॥
वधुजनमनःसु शशांकभ्रांतिमिति। माघे च ज्ञापयन् पवनव्याधैरिति॥ नैषधे च।
स्पृशन्सदा रस्तत् इहारन्नावमिति। कुवलयानंदे च। गुणदोषौ बुधो गृह्णन्निति। का
व्यप्रकाशे च। लिखन्नास्ते। भूमिमिति। किं बहुना नास्ति स विषयो यत्र प्रथमा समाना
धिकरणे शानज्जंतप्रयोगो नोपलभ्यते इति। अत्र च सिद्धांतकौमुद्यां समाधा
नयुक्तिरस्ति। परं तत्र धुलिकानां संशयच्छेदायन प्रभवति क्लिष्टत्वात्। तथाहि॥ ल
ड्रित्यनुवर्त्तमाने पुनर्लड्ग्रहणमधिकविधानार्थं। तेन प्रथमासामानाधिकरण्ये
क्वचिद्भवति। अत्रेदं चिन्त्यते॥ पूर्वसूत्राल्लडिति प्रथमांतमवश्यमनुवर्त्तते। अनुव
र्त्तनयोग्यत्वात्। न द्याः अनुवर्त्तेरावश्यकत्वे तन्निवेशनं विना वाक्यार्थयोजनान

स्यात्। प्रत्कृतमनुवर्त्तो वा कार्य्ये न संगच्छेत। स्वरितत्वनिश्चयं विना च कथमनु
वर्त्तेरावश्यकत्वमिति। प्रतिज्ञास्वरितान्हि पाणिनीया इति। नापि द्वितीयः सूत्रस्य
लट इति षष्ठ्यन्तं परित्यज्य प्रथमान्तमनुवर्त्स्यति तत्किं विपरिणामेनान्यथा वा
योजनियमिति चेत्। क्लिष्टैव योजना स्यात्॥ लटित्विबुध्या रोहासंजनात्। प्रत्यु
त धातोरित्यधिकारात्। कर्त्तरि कृदित्यधिकाराच्च शतृशानचोः प्रत्ययत्वप्रतीत्या
पत्तिरिति। ततः सूत्रे लट इत्यावश्यकं तयोरादेशत्वबोधनायेति न लडनुवृत्तिः स्फुट
त्वा। प्रक्रियत्वं तु लाघवप्रियेण मुनिना लघ्वैव कृतं स्यात्। अक्लिष्टनिबंधना
हि महान्तो भवंति। अन्यथा छंदसि लिट् लिटः कानज्वेति अत्रापि तथैव कुर्यादिति। ननु ल
टस्थाने तच्छष्ट्र निवेशो युज्यते॥ संप्रदायानुरोधात्। इत्संज्ञाविधानानंतरं मितो लोपप्र
तिवक्तव्ये तस्य लोपः इति स्वयं स्फुटत्वात्र रेदिति चेन्नैवं। स्वछंदवचना ह्याचार्या नवं ॥२॥

योजनवशाद् समर्थसमासाश्रयणे भाधाभावात्। नावप्रधाननिर्देशकल्पना
त्वत्र मुनेरविवक्षिता। विवक्षितत्वे तु भावप्रत्ययान्तपाठमेव कुर्यात्। प्रक्रिया
गौरवाभावात्। एवं च विशेष्ये प्रथमान्ते परे तदनुवादविशेषणीभूतशत्रुष्ठे
वत्तिषेधः॥ प्रवर्त्तते नत्तु विधेयविशेषणेषु पचपन्तं पश्य एवन्नित्यादिषु। तेषां क्रि
यान्वयित्वेन प्रथमान्तपरत्वाभावात्। अपचन्ब्राह्मण इत्यादेः कथं निर्वाह
इति चेद्योगविभागादित्युक्तमेव। नन्वत्र उपपदे इति परत इति च कुतो लभ्यते
इति चेदुच्यते॥ प्रथमं तु विशेषणस्य विशेष्यसापेक्षत्वेन तच्छ्रोतृप्रत्यायाध्याक्षिप
ते। द्वितीयं तु तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषया लभ्यते। न चेयं परिभाषा सं
धिकार्यमात्रविषया। अलुगुत्तरपदे इत्यादिषु कार्यमात्रान्यविषयत्वस्योपलंभात्।
ननु सन्नगच्छति ब्राह्मण इत्यादौ शत्रन्तप्रथमान्तयोर्व्यवहितत्वप्रयोगे नास्ति समाधा

श्री

नपेक्षेति चेन्न। उभयोरेतयोः पाठक्रमेणैव धानसंज्ञयेपि पठनक्रमेणान्वयानुपप
त्तेरार्थक्रमेणैव न धानेनास्त्येवेति समाधानसाकोच्चलंनिष्कस्तुहं। पाठक्रमादार्थक्रमो
बलीयानिति परिभाषाज्ञवर्त्तेते। न च बाहाहैवयुक्तेन मस्वस्तिस्वाहास्वधालंवषड्यो
गाच्चेत्यादिसूत्रे ग्रहणेषु तथैव दर्शनात्॥ सन्नाह्मणइति प्रथमांते परे शाखादेशो
समाहितवतां मूलकारस्याप्येवमेवात्ति आयुन्नीयते। व्याख्याबुद्धिबलापेक्षेति न्या
येन यथामति व्याख्यातमेतत्॥ आशाधरेणाविद्बुधारामजानन्दसूनुना॥ यदुराम
गुरोर्वाणीं समालोक्येति निवेदितं॥१॥ इत्याशाधरभट्टविरचितः शत्रुशानजादेशविचा
रः संपूर्णः॥ ॥ अथ शानुक्तवात्यायोजनायामपि पचन् ब्राह्मण एवं इत्यादिषु प्रथमा
समानाधिकरणत्वं तेषु स्तुत्याधियाविचार्यमाणेस्त्वार्थे न दोषो नावतरति। ते
षां क्रियासामानाधिकरण्यस्य प्रबलस्य विद्यमानत्वात्। निषधत्त्वनतमात्रसा ॥६॥

कारांतरेष्विंद्रदेशाद्य वदितार्थः॥ शतृशानचावपि वित्तस्यांतरसामानाधिकरण्ये
चरितार्थाविति विप्रतिषेधे परं कार्यमिति शतृशानचौ तिङो बाधने अन्वतः। न
बाधनमिति वस्पर्धपर्युदासविधानमावश्यकमिति॥ अथ युष्मद्युपपदे समानाधि
करणे स्थानिन्यपि मध्यमः॥ अस्मद्युत्तमः॥ शेषे प्रथमः॥ इति त्रिसूत्र्यां सुपपदं प्र
थमांतमेव संभवति॥ कर्मणि लकारे कर्मणः कर्तरि लकारे कर्तुश्चाभिहितत्वेन
तत्र प्रातिपदिकार्थमात्रे प्रथमा प्राप्तेः। तदंतेन लकारस्य सामानाधिकरण्यं कथं
मुपपद्यते। लक्षणं हि एकविभक्तिकत्वे सत्येकार्थनिष्ठत्वमिति। तच्च सुपः॥
पटोदस्य पतेइत्यादावनुवाद्योपटः सुपः क्रियत इत्यादौ विधेये च टिलिगला
पतोदेवदत्तः पचतीत्यादौ तु कथं तल्लक्षणं भवतीति चेदुच्यते। एतल्लक्षणस्य
प्रायिकत्वेन क्वचिद्व्यभिचारेपि दोषो नास्त्युपेयः॥ अथ हृदयस्य हल्लेख इति तोगो

ते
=

चरत्वेनैकाश्रयवर्त्तित्वं तद्धितिविवक्षितत्वात्। चैत्रः पचतीत्यादौ हि लकारः
कर्तृसामान्यवाचि चैत्रपदमिति प्रथमान्तं चैतद्विशेषकवाचकमिति निर्विशेषं न सा
मान्यं। विशेषानतद्भिन्नतादृत्ति सिद्धांतादेकस्मिन्नेव अपि डेकत्वे चैत्रत्वयोरवि
रोधेनावस्थानात् सामानाधिकरण्यं निर्विवादं॥ शुक्लः पट इत्यादौ विशेषणवि
शेष्यभावेन सामानाधिकरण्येऽसमानविभक्तिकत्वनियमो न लुप्तकारांतरेऽपि
तद्वेत्याचार्यव्यवहाराद्ध्यवसीयते॥ अथ विधेयविशेषणीभूतो नांसमाधानो
पायापेक्षा चेदसमर्थकगिरोल धारणीयाः। तथाहि। असमर्थसमासमानाधिकरण
इत्यस्य प्रथमान्ते समानाधिकरणेऽपपदे परतः शानच् शानचौ न भवत इति व्या
ख्यानमुपपन्नं तथ्यं॥ असमर्थनञ्समासस्वीकारात्। असूर्यललाटयोरिति
सूत्रे: सूर्यशब्देन ज्ञापनादनाचिचेति सूत्रव्याख्याने तयोर्गीकाराच्च चित्त ॥५॥

मानाधिकरण्यविषयः। तेन यत्र प्रथमान्तमात्रे यत्रान्वयपर्यवसानं विवक्षितं
स्याद्यत्र तस्य च क्रियापदेन साकं न हयययोग्यता च न स्यात्। तथान्वयाकांक्षा च व
रूपकीनभवेत् तत्रैव कर्त्तालोकप्रत्युक्तं यन्नित्यादिशास्त्रलिखितप्रत्यक्षाहरणे पुत्रा
दिशात्रुक्रियान्वयनिराकांक्षासाहित्यकत्वयुक्तेषु शब्दांतरेषु च निषेधः प्रवर्त्तते। यत्र
च शास्त्रं तस्यानेकविधसामानाधिकरण्यसंभवस्तत्र हि क्रियापदसामानाधिकर
ण्यमेव मुख्यं तदितरपदसामानाधिकरण्यं च गौणमिति गौणमुख्ययोर्मुख्ये कार्य
संप्रत्यय इति परिभाषया प्रधानक्रियासामानाधिकरण्यानुरोधेन पक्षपन्नप्रत्यय
न्तीत्यादिषु लटः शत्रादेशो बोधनास्ति एकवाक्ये हि प्रयुज्यमानानि पदानि सान्तस्य
प रंपरया वा सर्वाण्यपि क्रियायामेवोपजीवंति। तत्र कारकाणि साक्षात्संबंधेन। तद्विशे
षणानि च परंपरासंबंधेनैव तत्रापि सकर्मकधातुप्रयोगे कर्तृकर्मणी अक

र्मकधातुप्रयोगेच कर्तृमात्रमितिविवेकः। यथाजालमानाणि लोकानि स्वस्वसुखार्थमा
तरमाकांक्षंतिसर्वदा तत्संमुखीनानि च भवेति। तथा सर्वाणि कारकाणि वाक्ये प्रयु
क्तमात्राणि स्वान्वयसिध्यर्थं क्रियापदमाकांक्षंति। विशेषतश्च कर्तृकर्मणी तयोरु
त्पत्तिहेतुः प्रथमांतत्वं भवति ततः प्रथमांतपदं तदुपजीवकं सा च तदुपजीव्येति
तस्या एव प्राधान्येनान्वयपर्यवसानं ननु प्रथमांत इति। तत्सद्भावे त्वादौ केचिद
न्वयविश्रांतिमिमं ते। तत्रापि क्रियापदाध्याहारं विना संदिग्धत्वप्रशान्त्यादेशोऽदुर्लभः।
अतश्च नवीनैर्लाभाष्यकारेणैकमस्ति भवति परः प्रथमपुरुषेऽप्रयुज्यमानोऽ
प्यस्तीति। तदुदाहरणं चोक्तं वार्तिककृता। एकतिङ् वाक्यमिति। एकं तिङ् यत्रेति वि
ग्रहः तत्र बहुलपदानां संनियमो नास्ति यत्र तादृशाः॥ पदसमुदायो वा स्यादिति स
र्थः। सिद्धः सुप्तिङंतचयो वाक्यं क्रियाकारकान्वितैरमरः। केवलानि सुबं ॥१॥

तानां तिङंतानां च चयो न वाक्यं। तत्र च क्रियापदप्राधान्यबोधनार्थं प्रकारांतरमु
क्तमिति॥ किंच एकं मुख्यं तिङः यत्रेति तत्रैणार्थांतरमपि विवक्षितमस्ति। तावता प्रधा
नमाख्यातमिति यास्कवचनानुरोधात्। आख्याबुद्धिवलापेक्षो वेति न्यायेन यथाम
तीषमेष निर्णयद्गुपपादितः पिपठिषुभिर्यार्थं॥ आशाधरेण विदुषा रामजीत
दूसूनुना। पदुरामभुक्तो वर्णितं प्रमाणेति निवेदितं॥१॥ ॥इति श्री पदवाक्य
प्रमाणपारावारीणरामजित्तनूजाशाधरविरचितश्चान्द्रशानजादेशवि
चारः संपूर्णः॥ ॥ ॥ श्री॥